# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रिप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम्–५<br>(C.C.- 1.1.1. New ) | गुणाः – ७० |
| विषयः – फलितज्यौतिषम् | | समयः ११:३० तः २:३० |
| दिनाङ्कः – १४/१०/२०१९ | सन्दर्भग्रन्थः – मुहूर्तचिन्तामणिः | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) वर्जयेत् सर्वकार्येषु हस्तार्कं पञ्चमीतिथौ ।
भौमाश्विनीञ्च सप्तम्यां षष्ठ्यां चन्द्रैन्दवं तथा ।

(ख) बुधानुराधामष्टम्यां दशम्यां भृगुरेवतीम् ।
नवम्यां गुरुपुष्यञ्चैकादश्यां शनिरोहिणीम् ॥

(ग) मघादिपञ्चपादेषु गुरुः सर्वत्र–निन्दितः ।
गङ्गागोदान्तरं हित्वा शेषङ्घ्रिषु न दोषकृत ॥
मेषेऽर्के सत् व्रतोद्वाहौ गंगागोदान्तरेऽपि च ।
सर्वं सिंहगुरुर्वर्ज्यः कलिंगे गौड गुर्जरे ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(क) आनन्दादि अष्टाविंशतियोगाः चक्रसहितम् ।

(ख) दग्धविषहुताशनयमघण्टयोगाः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम् ।
तत्र स्थिरं बीजगेहशान्त्यारामादिसिद्धये ॥

(ख) सूर्यर्क्षात् रसभैरधः स्थलगतैः पाको रसैः संयुतः ।
शीर्षे युग्ममितैः शवस्य दहनं मध्ये युगैः सर्पभीः ॥
प्रागाशादिषु वेदगैः स्वसुहृदां स्यात्संगमो रोगभीः ।
क्वाथादेः करणं सुखं च गदितं काष्ठादिसंस्थापने ॥

(ग) अभुक्तं मूलं घटिकाचतुष्टयं ज्येष्ठान्त्यमूलादिभवं हिनारदः ।
वसिष्ठ एकद्विघटीमितं जगौ बृहस्पतिस्त्वेकघटीप्रमाणकम् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(क) काष्ठसंग्रहमुहूर्तत्रिपुष्करयोगश्च ।

(ख) जलाशय, बगीचा तथा देवप्रतिष्ठामुहूर्तः ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) संक्रान्तिधिष्ठ्याधरधिष्ण्यतस्त्रिभे स्वभे निरुक्तं गमनं ततोऽङ्गभे
सुखं त्रिभे पीडनमङ्गभेंऽशुकं त्रिभेऽर्थहानी रसभे धनागमः ॥

(ख) क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेऽर्कविद्गुरुसितेन्दुदिनेव्रतं सत् ।
द्वित्रीषुरुद्ररविदिक् प्रमितं तिथौ च कृष्णादिमत्रिलवकेऽपि न चापराह्णे ॥

(ग) वेदक्रमाच्छशिशिवाहिकरत्रिमूल–पूर्वासुपौष्णकरमैत्रतमृगादितीज्ये ।
ध्रौवेषु चाश्विवसुपुष्यकरोत्तरेशकर्णे मृगान्त्यलघुमैत्रधनादितौ सत् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(क) ब्रह्मणादिवर्ण तथा वेदानां स्वामी ।

(ख) संस्कारप्रकरणम् ।

## संयुक्तान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) अनन्तदैवज्ञस्य पुत्रः कः ?

(२) मुहूर्तचिन्तामणिग्रन्थं कः रचितवान् ?

(३) सप्तमीतिथेः स्वामी कः ?

(४) विवाहसंस्कारे किं नक्षत्रं कस्मिन् दिने त्याज्यं भवति ?

(५) मघादिपञ्चपादेषु गुरुः फलं किम् ?

(६) अश्विनीनक्षत्रस्याकृतिः कीदृशं भवति ?

(७) स्थिरसंज्ञकनक्षत्रे कानि कानि कार्याणि भवन्ति ?

(८) अन्धनक्षत्रे विनष्टवस्तूनां लाभः भवति वा न ?

(९) मैत्रशब्दस्य अर्थे कस्य नक्षत्रस्य ग्रहणं भवति ?

(१०) त्वष्टा कस्य नक्षत्रस्य स्वामी अस्ति ?

(११) जलाशयारामसुरप्रतिष्ठा कस्मिन् अयने भवति ?

(१२) तोरणशब्दस्य कोऽर्थः ?

(१३) उपचयस्थानानि कानि ?

(१४) कौ द्वौ स्थानौ शुद्धापेक्षितौ भवतः ?

(१४) कस्मिन् वारे नक्षत्रे च नौका निर्माणं शुभं भवति ?

----oooo----